# 2020

## SANSKRIT — HONOURS

### Paper : DSE-2

### (KĀVYA)

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section – A**

**Unit – I**

**(Marks : 20)**

1. अधोलिखितेषु यथेच्छ***मेकस्य*** उत्तरं संस्कृतभाषया देवनागरीलिप्या च लेख्यम्।

(a) साहित्यदर्पणस्य प्रथमपरिच्छेदमनुसृत्य विश्वनाथसमर्थितं काव्यप्रयोजनं विव्रियताम्। 10

(b) मम्मटनिरूपितकाव्यलक्षणे प्रयुक्तस्य 'अदोषौ' इति पदस्य अनावश्यकता विश्वनाथमतमनुसृत्य विचार्यताम्। 10

(c) "काव्यस्यात्मा ध्वनिः—" इति कस्यालंकारिकस्य मतम्? विश्वनाथेन तत् समर्थितं न वेति विचार्यताम्। 2+8

2. अधोलिखितेषु ***विषयद्वय***मवलम्ब्य संस्कृतभाषया देवनागरीलिप्या च टीका कार्या। 5×2

(a) आचार्यविश्वनाथकृतं मङ्गलाचरणम्।

(b) रसाभासः।

(c) वक्रोक्तिः।

(d) रीतिः।

**Unit – II**

**(Marks : 25)**

3. अधोलिखितेषु यथाभिमत***मेकस्य*** उत्तरं संस्कृतभाषया देवनागरीलिप्या च लेख्यम्।

(a) विश्वनाथमतानुसारेण वाक्यस्वरूपं विचार्य तद्भेदोऽपि सोदाहरणं विविच्यताम्। 8+2

(b) शब्दस्य सङ्केतः कुत्र गृह्यत इत्यस्मिन् विषये विश्वनाथस्य मतमुपस्थाप्यताम्। 10

(c) विश्वनाथमतानुसारेण लक्षणायाः स्वरूपं सोदाहरणं व्याख्याय उपादानलक्षणायाः स्वरूपं सोदाहरणं विचार्यताम्। 5+5

**4.** अधोलिखितेषु कस्यचि***देकस्य*** संस्कृतभाषया देवनागरीलिप्या च व्याख्या करणीया। 7×1

(a) वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः।

(b) तत्र सङ्केतितार्थस्य बोधनादग्रिमाभिधा।

(c) सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च।

**5.** अधोलिखितेषु ***द्वयोः*** टीका संस्कृतभाषया देवनागरीलिप्या च लेखनीया। 4×2

(a) महावाक्यम्।

(b) लक्षणलक्षणा।

(c) वाच्यार्थः।

(d) तात्पर्यार्थः।

**Unit – III**

**(Marks : 20)**

**6.** अधोलिखितेषु ***षट् प्रश्नाः*** संक्षेपेण पूर्णवाक्येन च (संस्कृतभाषया देवनागरीलिप्या च) समाधेया। 2×6

(a) विभावानुभावव्यभिचारिस्थायिभावेषु कः रसतामेति?

(b) व्यभिचारिपदस्य व्युत्पत्तिः प्रदर्श्यताम्।

(c) "सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः" — अत्र चिन्मय-शब्दे कस्मिन् अर्थे मयट्प्रत्ययः?

(d) विश्वनाथस्य मते रसास्वादं प्रति कस्याः हेतुत्वम्?

(e) विश्वनाथमतमनुसृत्य वासनाभेदः नामतः लिख्यताम्।

(f) "त्रयाणामेव रसोद्बोधे कारणत्वमुच्यते" — अत्र केषां त्रयाणां ग्रहणं बोधितम्?

(g) विश्वनाथस्य मते विभावलक्षणं किम्?

(h) विभावभेदः नामतः लिख्यताम्।

(i) विश्वनाथस्य मते अनुभावलक्षणं किम्?

**7.** अधोलिखितेषु कस्यचि***देकस्य*** संस्कृतभाषया देवनागरीलिप्या च व्याख्या कार्या। 8×1

(a) चमत्कारश्चित्तविस्ताररूपो विस्मयापरपर्यायः।

(b) रस्यमानतामात्रसारत्वात् प्रकाशशरीरात् अनन्य एव हि रसः।

(c) करुणादावपि रसे जायते यत् परं सुखम्।
सचेतसामनुभवः प्रमाणं तत्र केवलम्॥